दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़कृष्णदशमी-एकादशी
आषाढः 26 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-258 | 1 | जुलाई 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 HP GOVT - राज्यप्रशिक्षुतापरिषदः सङ्घटनम्, युवभ्यः प्राप्स्यन्ते आजीविका-प्रशिक्षणस्य अवसराः

3 Monsoon Update - किन्नौर-मण्डले गृहाणामुपरि पतिताः शैलाः, पाँवटा-क्षेत्रे १० जुलाई दिनाङ्कं शिक्षणसंस्थानानि पिहितानि, षड्दिनानि यावत् वर्षिष्यन्ति मेघाः

4 जे.पी. नड्डा महोदयस्य बुद्धिजीविभ्यः आह्वानम् - 'विकसितभारत-२०४७' इति लक्ष्याय राष्ट्रनिर्माणे भागिनः भवन्तु

## प्रधानमन्त्रिणः नरेन्द्रमोदिनः उद्घोषः 'एकविंशति-शताब्द्याः नूतन भारत' विकसित-राष्ट्र-निर्माणस्य लक्ष्यं प्रति द्रुतगत्या अग्रसरति; मेलबोर्न-नगरे भारतीय-समुदायस्य भव्यं सम्मेलनं च असौ सम्बोधितवान्




**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत्, एकविंशति-शताब्द्याः भारतम् विकसित-भारतम् भवितुं सङ्कल्पबद्धो वर्तते। तेनोदीरितं यत् साम्प्रतं भारतं तादृशः देशः यः अधिक-विकासे विश्वसिति ।विगत-द्वादशवर्षेषु स्वस्य तृतीयम् ऑस्ट्रेलिया-भ्रमणं हैट्रिक इति विज्ञापयता तेन प्रतिपादितं यत्, एषः प्रवासः भारत-ऑस्ट्रेलिया-सम्बन्धानामूर्ध्वगामितां सूचयति । अत्रावसरे ऑस्ट्रेलिया-देशस्य प्रधानमन्त्री एन्थनी अल्बनीज इत्यसावपि तत्र उपस्थितः सीत्, तेन तत्रत्यं जन-उत्साहं दृष्ट्वा एषा सहभागिता दृढतरा इत्युक्तम्। अस्मात् पुरा, उभयोः देशयोः नेतृभ्यां मेलबर्न नगरे तृतीये भारत-ऑस्ट्रेलिया-वार्षिक-शिखर सम्मेलने भागं गृहीत्वा शिष्टमण्डल-स्तरीया द्विपाक्षिकी-वार्ता विहिता। हिन्द-प्रशान्त-क्षेत्रे शान्तिं स्थिरतां च स्थापयितुं द्वाभ्यां नेतृभ्यां रक्षा-सुरक्षा-सहयोग-संयुक्त-घोषणापत्रे हस्ताक्षरं विहितम् । प्रधानमन्त्री नरेन्द्रमोदी न्यगदत् यत् भारत-ऑस्ट्रेलिया-देशाभ्यां परमाणु ऊर्जा-क्षेत्रे कश्चन ऐतिहासिकः सहयोगः साधितः। अनेन ऑस्ट्रेलिया-देशात् भारताय यूरेनियम इत्यस्य पूर्तिः सुलभा भविष्यति। अयं सहयोगः भारतस्य स्वच्छ ऊर्जा-लक्ष्याय नवीनां गतिं प्रदास्यति। अनेनैव सह साइबर क्रिटिकल टेक्नोलॉजी एवं सप्लाई चेन-प्रणाल्याः सञ्चालनेन सहैव एकात्म-महत्त्वपूर्ण-खनिज-वीथि-निर्माणेन सामरिक प्रौद्योगिकी-सुरक्षा-क्षेत्रे अनवरतं समेधते। गतप्रातः उभौ प्रधानमन्त्रिणौ भारत-ऑस्ट्रेलिया-सीईओ-फोरम इत्यस्मिन् भागं गृहीतवन्तौ।

### अस्ट्रेलियादेशस्य यात्रायाः अनन्तरं प्रधानमन्त्री ऑकलैंड-(न्यूजीलैंड)-नगरं प्रति गमिष्यति

प्रधानमंत्री-नरेन्द्र-मोदिनः ऑस्ट्रेलीया-देशस्य अतीव सफलायाः राजकीय-यात्रायाः समापनं भवति। मेलबर्न-नगरे अद्य तस्य कार्यक्रमः समाप्तः भविष्यति। अतः परं सः स्वस्य त्रिदेशीय-यात्रायाः अग्रिम-चरणस्य आरम्भं करिष्यति। दिवसस्य आरम्भः गतदिने राजनयिक-मेलनेन अभवत्, यदा प्रधानमंत्री मोदी विपक्षस्य नेतृणा एंगस-टेलर-महोदयेन सह अमिलत्। प्रधानमंत्री मोदी ऑस्ट्रेलीया-देशस्य प्रधानमंत्रिणा एंथनी-अल्बानीज़-महोदयेन सह प्रतिष्ठितस्य मेलबर्न-क्रिकेट-क्रीडाङ्गणस्य (MCG) भ्रमणं करिष्यति। द्विपक्षीय-सहयोगस्य तीव्रगत्या वर्धमानस्य क्षेत्रस्य रूपेण क्रीडायाः उल्लेखं कुर्वन्तौ उभौ नेतारौ अस्मिन् अवसरे ऐतिहासिकस्य 'भारत-ऑस्ट्रेलीया-क्रीडासहयोग-मार्गचित्रस्य' (रोडमैप) अनावरणं करिष्यतः।भारतं २०३० (द्विसहस्रत्रिंशत्) तमे वर्षे राष्ट्रमण्डल-क्रीडानां (commonwealth games) आतिथ्यं करिष्यति तथा च ऑस्ट्रेलीया-देशः २०३२ (द्विसहस्रद्वात्रिंशत्) तमे वर्षे ओलम्पिक-क्रीडानां आतिथ्यं करिष्यति। ईदृशे समये एतत् रणनीतिक-मार्गचित्रं व्यापक-सहयोगस्य अवसराणां द्वाराणि उद्घाटयितुं प्रतिज्ञां करोति। अनेन सह क्रिकेट-क्रीडया साकम् अन्य-क्रीडाः अपि द्वौ लोकतन्त्रौ सङ्योजयितुं एकस्य सशक्तस्य "सजीव-सेतोः" रूपेण अधिकाः दृढाः भविष्यन्ति।एषा स्मरणीया राजकीय-यात्रा अद्य अपराह्णे आधिकारिकरूपेण समाप्ता भविष्यति। प्रधानमंत्री तस्य प्रतिनिधिमण्डलञ्च मेलबर्न-नगरात् प्रस्थाय तस्मान-सागरं तीर्त्वा ऑकलैंड-(न्यूजीलैंड)-नगरं प्रति गमिष्यति, यतः अस्याः त्रिदेशीय-यात्रायाः अन्तिम-चरणस्य आरम्भः भविष्यति।

## सुभाषितम्

**आचारप्रभवो धर्मः,**
**सन्तश्चाचारलक्षणाः।**
**साधूनां च यथावृत्तम्,**
**एतदाचारलक्षणम्॥**

अर्थात्- सदाचार ही धर्म की उत्पत्ति का मूल है। सज्जनों की पहचान उनके आचरण से ही होती है। संत और श्रेष्ठ पुरुष जैसा व्यवहार करते हैं, वास्तव में वही सदाचार कहलाता है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

### उपराष्ट्रपतिना सी. पी. राधाकृष्णन् इत्यनेन भुवनेश्वरे एकस्य ऐतिहासिक राष्ट्रियाभियानस्य विधिवत् शुभारम्भः अकारि



हिमसंस्कृतवार्ता। उपराष्ट्रपतिना सी. पी. राधाकृष्णन् इत्यनेन भुवनेश्वरे ओडिशा-कृषि-एवम्-प्रौद्योगिकी-विश्वविद्यालयस्य प्राङ्गणे भारतस्य उच्च-समुद्र-मत्स्यपालन-सम्पदः शाश्वत-उपयोगाय एकस्य ऐतिहासिक राष्ट्रियाभियानस्य विधिवत् शुभारम्भः अकारि। अत्रावसरे 'ब्लू इकोनॉमी' इति समुद्र- धारित अर्थव्यवस्था इत्येतद् राष्ट्रिय-समृद्धः एकं दूरगामी परिवर्तनकारी इञ्जन् इति वर्णयन् उपराष्ट्रपतिः देशस्य यूनां प्रति वह्वानं कृतवान् यत् तैः 'विकसित-भारतस्य' धारशिलात्वेन धुनिकाः प्रौद्योगिकी-सञ्चालिताः मत्स्यपालन-सामुद्रिक-वृत्तयः पूर्णोत्साहेन अङ्गीकरणीयाः।

## उत्तराखण्ड-राज्यं साक्षरता मानदण्डान् सम्प्राप्य देशस्य षष्ठं पूर्ण-साक्षर-राज्यं भवितुं गौरवास्पदं स्थानम् अवाप्तवान्



हिमसंस्कृतवार्ता। उत्तराखण्ड-राज्यं राष्ट्रिय-शिक्षा-नीति विंशतेः "उल्लास" इति नूतन-भारत-साक्षरता-कार्यक्रमस्य अन्तर्गतं निर्धारितान् वयस्क साक्षरता मानदण्डान् सम्प्राप्य देशस्य षष्ठं पूर्ण-साक्षर-राज्यं भवितुं गौरवास्पदं स्थानम् अवाप्तवान्। केन्द्रीय-शिक्षा-मन्त्रालयस्यविद्यालय-शिक्षा-एवम् साक्षरता विभागद्वारा निर्धारितानां मानदण्डानां पूर्त्यनन्तरं गतदिने राज्यपालेन अस्याः ऐतिहासिक-घोषणायाः अनुमोदनं कृतम्। अन्यासाम् उपलब्धीनां शृङ्खलायाम्, अनेन कीर्तिमानेन सह उत्तराखण्डः अधुना मिजोरम, गोवा, त्रिपुरा, हिमाचलप्रदेश तथा सिक्किम इत्यादिनां पूर्ण-साक्षर-राज्यानां सूच्यां सम्मिलितो जातः, यः राज्यस्य शैक्षणिक-विकासस्य यात्रायाम् एकः महत्वपूर्णः अवसरो वर्तते। मुख्यमन्त्री पुष्करसिंहधामी इमाम् उपलब्धिं 'ऐतिहासिकी' इति वर्णयन् सहर्षं प्रावोचत् यत् सफलतेयं सर्वकारस्य निरन्तर प्रयासानां सममेव राज्यस्य नागरिकाणां सक्रियसहभागितायाः एव सुखदः परिणामो वर्तते।

### सेनाप्रमुखस्य पुंछ-सीमा-प्रवासः सुरक्षा-समीक्षा च

सेनाप्रमुखः जनरल-धीरज-सेठः पुंछ-जनपदस्य अग्रिम-सीमा-चौकीनां भ्रमणं कृतवान् तथा च वर्तमानायाः सुरक्षा-स्थितेः सैन्य-सिद्धतानां च समीक्षां कृतवान्। पदभार-ग्रहणात् परं सेनाप्रमुखस्य पुंछ-क्षेत्रस्य अग्रिम-स्थानेषु अयं प्रथमः प्रवासः अस्ति। सेनाप्रमुखः नगरोटा-स्थित-व्हाइट-नाइट-कोर-मुख्यालये वरिष्ठ-कमाण्डर-अधिकारिभ्यः जम्मू-क्षेत्रस्य सुरक्षा-स्थितेः सैन्य-सिद्धतानां च विषये विवरणं प्राप्तवान्। सेनाप्रमुखः पुंछ-ब्रिगेड-मुख्यालये अपि वरिष्ठ-सैन्य-अधिकारिभिः सह मेलनं कृतवान्। शीर्ष-अधिकारिभिः सेनाप्रमुखाय समग्र-सुरक्षा-वातावरणस्य तथा च समस्यानां निवारणाय सैनिकानां सिद्धतानां विषये अवगतं कृतम्।

# HP GOVT - राज्यप्रशिक्षुतापरिषदः सङ्घटनम्, युवभ्यः प्राप्स्यन्ते आजीविका-प्रशिक्षणस्य अवसराः




- **तकनीकी-शिक्षा-विभागेन प्रसारिता अधिसूचना, प्रधानसचिवः अभिषेकजैनः विहितः अध्यक्षः**

**हिमसंस्कृतवार्ताः — शिमला ।**
हिमाचलप्रदेशसर्वकारेण राज्ये कौशलविकासं प्रशिक्षुताकार्यक्रमांश्च भूयः प्रभावशालिनः विधातुं 'राज्यप्रशिक्षुतापरिषदः' सङ्घटनम् विहितम्। तकनीकी-शिक्षा, व्यावसायिक-एवं-औद्योगिकप्रशिक्षणविभागेन अस्मिन् सन्दर्भे अधिसूचना प्रसारिता अस्ति। परिषदः एतत् सङ्घटनम् सद्यःप्रभावेण त्रिवर्षाणां कृते कृतम्। अस्मिन् सर्वकारस्य विभिन्नानां विभागानां, सार्वजनिकोपक्रमाणां (PSUs), उद्योगजगतः, तकनीकीशिक्षायाः च सम्बद्धाः प्रतिनिधयः सम्मिलिताः सन्ति। युवभ्यः आजीविकायाः (रोजगारस्य) अवसरप्रदानाय एतद् परिषद् कार्यं विधास्यति। कृत-अधिसूचनानुसारं, तकनीकीशिक्षाविभागस्य प्रधानसचिवः परिषदः अध्यक्षः नियुक्तः अस्ति।

### विभिन्नानां विभागानां प्रतिनिधयः अङ्गीकृताः

तकनीकी-शिक्षा, व्यावसायिक-एवं-औद्योगिकप्रशिक्षणविभागस्य निदेशकः अस्य सदस्यसचिवः भविष्यति। परिषदि उद्योगविभागस्य, श्रम-एवं-रोजगारविभागस्य, हिमाचलप्रदेश-राज्यविद्युन्मण्डलस्य तथा च हिमाचलप्रदेश-राज्यऔद्योगिकविकासनिगमस्य प्रतिनिधयः सम्मिलिताः सन्ति। हिमाचलप्रदेश-पथपरिवहननिगमस्य (HRTC), उच्चशिक्षाविभागस्य, हिमाचलप्रदेश-पर्यटनविकासनिगमस्य (HPTDC), हिमुडा (HIMUDA) इत्यस्य च प्रतिनिधयः अपि सदस्याः विहिताः। खाद्य-एवं-नागरिकआपूर्तिनिगमस्य, लोकनिर्माणविभागस्य (PWD), जलशक्तिविभागस्य, नगर-एवं-ग्रामनियोजनविभागस्य (TCP), पर्यावरण-विज्ञान-एवं-प्रौद्योगिकीविभागस्य च प्रतिनिधयः अपि अस्मिन् समाविष्टाः सन्ति। भारतसर्वकारस्य प्रशिक्षुताप्रशिक्षणनिदेशालयस्य प्रतिनिधिः अपि परिषदि स्थानं प्राप्तवान् अस्ति।

### योजनानां प्रभावी-क्रियान्वयने भविष्यति साहाय्यम्

सर्वकारस्य मान्यता अस्ति यत् परिषदः सङ्घटनेन राज्ये प्रशिक्षुताकार्यक्रमाणां सञ्चालने, निरीक्षणे (मॉनिटरिंग), विस्तारे च नूतना गतिः प्राप्स्यते। विभिन्नानां विभागानां उद्योगानां च प्रतिनिधीनां सहभागितया युवकेभ्यः अधिकाधिकं रोजगारप्रशिक्षणम् उपलब्धं भविष्यति। अनेन उद्योगानाम् आवश्यकतानुसारं कौशलविकासकार्यक्रमाणां सज्जतायां साहाय्यं प्राप्स्यते। परिषद् राज्ये प्रशिक्षुता-सम्बद्धेषु विषयेषु सर्वकाराय परामर्शान् प्रदास्यति। एषा योजनानां प्रभावी-क्रियान्वयने अपि प्रमुखां भूमिकां निर्वक्ष्यति। परिषदः एतत् सङ्घटनम् जनहिताय सद्यःप्रभावेण प्रवर्तितम् भविष्यति।
तकनीकीशिक्षाविभागस्य प्रधानसचिवस्य अभिषेकजैनस्य पक्षतः एषा अधिसूचना प्रसारिता अस्ति। तेन प्रोक्तं यत् अधिसूचनायाः सूचना राष्ट्रियप्रशिक्षुतापरिषदं, भारतसर्वकारस्य श्रम-एवं-रोजगारमन्त्रालयं, रोजगार-एवं-प्रशिक्षण-महानिदेशकं च प्रति प्रेषिता अस्ति। तकनीकीशिक्षाविभागस्य निदेशकः निर्दिष्टः यत् एषा अधिसूचना विभागीयसङ्केतस्थले (वेबसाइट) अपलोड् विधातव्या। साकमेव एतद् परिषदः सर्वेभ्यः सदस्येभ्यः प्रदेशस्य च सर्वेभ्यः सर्वकारीय-आई.टी.आई. (ITI) प्रधानाचार्येभ्यः अपि प्रापयितव्या।

# हिमाचलप्रदेश-लोकसेवायोगेन आरक्षकपदानां विज्ञापनं प्रसारितम्, १० जुलाईतः आवेदनानि आरप्स्यन्ते

हिमाचलप्रदेशस्य आरक्षकविभागे (पुलिस) वृत्ति-अन्वेषणं (नौकरी) कुर्वद्भ्यः युवेभ्यः महान् हर्षस्य विषयः अस्ति। हिमाचलप्रदेश-लोकसेवायोगेन आरक्षकपदानां (कांस्टेबल) ७३४ रिक्तपदेषु नियुक्त्यै विज्ञापनं प्रसारितम्। एतेषु ४९१ पदानि पुरुष-आरक्षकाणां तथा च २४३ पदानि महिला-आरक्षकाणां सन्ति। एतेषां पदानां कृते १० जुलाईतः (दशम-दिनाङ्कात्) अन्तर्जाल-माध्यमेन (ऑनलाइन) आवेदन-प्रक्रिया आरप्स्यते, आवेदनस्य अन्तिमा तिथिः च ६ अगस्तः (षष्ठ-दिनाङ्कः) अस्ति। निर्धारिते समये गते आवेदन-संयोजकः (लिंक) स्वयमेव पिहितः भविष्यति।भर्ती-विज्ञापनस्य अनुसारं पुरुषवर्गस्य ४९१ पदेषु सामान्यवर्गः, अनुसूचितजातिः (SC), अनुसूचितजनजातिः (ST), अन्यपिछड़ावर्गः (OBC), आर्थिकरूपेण दुर्बलवर्गः (EWS), बी.पी.एल. (BPL), गृहसंरक्षकः (होमगार्ड) तथा च स्वतन्त्रतासेनानी-आश्रिताः (वार्ड ऑफ फ्रीडम फाइटर्स) इति विभिन्नानां श्रेणीनां कृते आरक्षणस्य प्रावधानं कृतम् अस्ति।तथैव महिलावर्गस्य २४३ पदेषु अपि सामान्य-एससी-एसटी-ओबीसी-ईडब्ल्यूएस-गृहसंरक्षक-भूतपूर्वसैनिकआश्रित-बीपीएल तथा च स्वतन्त्रतासेनानी-आश्रित-श्रेणीभ्यः पृथक्-पृथक् पदानि आरक्षितानि सन्ति।आयोगेन स्पष्टीकृतं यत् अन्तर्जाल-माध्यमं (ऑनलाइन) विहाय अन्येन केनापि माध्यमेन प्रेषितानि आवेदनानि न स्वीकरिष्यन्ते, तानि च साक्षात् निरस्तानि भविष्यन्ति। अभ्यर्थिनः आवेदनपत्र-पूरणसमये विशेषसावधानतां धरितुं सूचिताः, यतः एकवारं आवेदनं अन्तिमरूपेण प्रेषितं (सबमिट) चेत् तस्मिन् किमपि संशोधनं कर्तुं न शक्यते। आवश्यकी शैक्षणिक-योग्यता, पात्रता-शर्तः, परीक्षा-शुल्कं तथा च नियुक्त्या सम्बद्धा विस्तृता सूचना आयोगेन प्रसारिते विस्तृते विज्ञापने उपलब्धा अस्ति। शासकीय-वृत्तेः (सरकारी नौकरी) आकांक्षिणाम् कृते अयं सुवर्ण-अवसरः अस्ति।




# 'नूतन-औद्योगिकनीत्या व्यापार-सौकर्यं प्राप्स्यते प्रोत्साहनम्'- मुख्यमन्त्री सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुमहोदयेन कथितं यत् राज्यसर्वकारः नूतन-औद्योगिकनीतिं अन्तिमरूपं प्रदातुं प्रक्रियायां संलग्ना अस्ति, या शीघ्रमेव अधिसूचिता विधास्यते। नूतनी नीतिः राज्ये निवेशम् आकर्ष्टुं, युवकानामर्थे जीविकायाः नूतनावसरान् सृजितुं तथा च हिमाचलप्रदेशे व्यापार-सौकर्यं (ईज ऑफ डूइंग बिजनेस) भूयः श्रेष्ठं विधातुं प्रमुखां भूमिकां निर्वक्ष्यति। सः बुधवासरे सायं उद्योगविभागस्य समीक्षा-उपवेशनस्य अध्यक्षतां कुरुन् आसीत्। तेन प्रोक्तं यत् नीतिं व्यापिकां उद्योगानुकूलां च विधातुं सर्वैः हितधारकैः (स्टेकहोल्डर्स) साकं विमर्शः विधीयते। साकमेव, निवेशवर्धनस्य उद्देश्यात् एकल- गवाक्ष- स्वीकृतिप्रणाली (सिंगल विंडो सिस्टम) अपि सुदृढीक्रियते।

## नियमाः प्रक्रियाश्च सरलीक्रियन्ते

मुख्यमन्त्रिणा प्रतिपादितं यत् 'ईज ऑफ डूइंग बिजनेस' प्रचेष्टायाः अन्तर्गतं नियमाः प्रक्रियाश्च सरलीक्रियन्ते, येन उद्योगपतयः स्वकीय-उद्योगानां स्थापनां सञ्चालनञ्च भूयः सारल्येन कर्तुं शक्नुयुः। तेन उक्तं यत् गतेषु सार्ध-त्रिवर्षेषु अस्यां दिशी बह्व्यः नीतिगताः प्रचेष्टाः वैधानिकपरिष्कारश्च विहिताः। मुख्यमन्त्रिणा ऊना-मण्डले विकस्यमानस्य 'बल्क ड्रग पार्क' (औषधि- उद्यानम्) धर्मशालायां निर्माणाधीनस्य 'यूनिटी मॉल' (एकता-विपणिः) चेत्यस्य कार्याणां समीक्षां कुर्वता अधिकारिणः द्वयोः परियोजनयोः वेगीकरणाय निर्दिष्टाः। तेन प्रोक्तं यत् देशस्य प्रख्याताः संस्थाः बल्क-ड्रगपार्क मध्ये निवेशार्थम् आमन्त्रयितव्याः। २,०७१ कोटिरूप्यकाणाम् अस्याः परियोजनायाः प्रदेशस्य युवकानामर्थे बृहत्स्तरे आजीविकायाः अवसराः सृजिताः भविष्यन्ति। तेन ज्ञापितं यत् प्रायः ८०० बीघा-परिमितं भूमिः समतला विहिता अस्ति कार्याणि च युद्धस्तरे प्रचलन्ति।

## 'एकं मण्डलं, त्रीणि उत्पादानि' (वन डिस्ट्रिक्ट, थ्री प्रोडक्ट्स) योजना

मुख्यमंत्रीमहोदयेन अधिकारिणः आगामि-१५ जुलाई दिनाङ्कं यावत् 'कॉमन एफ्लुएंट ट्रीटमेंट प्लांट' तथा 'स्टीम जनरेशन' सुविधायाः कार्यं पूर्णं कर्तुम् अपि आदेष्टाः। धर्मशालायां निर्माणाधीन- यूनिटी-मॉल-परियोजनायाः समीक्षां कुर्वन् मुख्यमन्त्री अवदत् यत् एतदर्थं ६६ कोटिरूप्यकाणां प्रथमांशं प्रसारितम् अस्ति कार्यञ्च प्रगतिपथे वर्तते। मुख्यमन्त्रिणा अधिकारिणः 'एकं मण्डलं, त्रीणि उत्पादानि' (वन डिस्ट्रिक्ट, थ्री प्रोडक्ट्स) कार्यक्रमस्य अन्तर्गतम् उत्पादानां परिचयाय निर्दिष्टाः। तेन कथितं यत् राज्यसर्वकारः ग्रामीण-अर्थव्यवस्थां सुदृढीकर्तुं कटिबद्धः अस्ति। एषा प्रचेष्टा जनेभ्यः नूतनावसरान् सृजन्ती साकमेव तेषाम् आर्थिकस्थितिम् अपि सुदृढां विधास्यति।

# Monsoon Update - किन्नौर-मण्डले गृहाणामुपरि पतिताः शैलाः, पाँवटा-क्षेत्रे १० जुलाई दिनाङ्के शिक्षणसंस्थानानि पिहितानि, षड्दिनानि यावत् वर्षिष्यन्ति मेघाः






**हिमसंस्कृतवार्ताः — शिमला।**
हिमाचलप्रदेशे प्रचण्डवृष्टेः क्रमः प्रचलति। प्रदेशस्य राजधान्या शिमलया (शिमला) सह अन्यभागेषु विगतरात्रितः निरन्तरं वृष्टिः जायमाना अस्ति। बहुषु क्षेत्रेषु महतीवृष्टिः अङ्किता। किन्नौरमण्डलस्य 'लिप्पा' क्षेत्रे निरन्तरवृष्टेः मध्ये 'पेजर'-उपनदे (खड्ड) अकस्मात् आगतेन प्रवाहेण (बाढ़) भूरिसङ्ख्यायां मृत्तिका, प्रस्तराः, मलिनावशेषः च प्रवाहिताः। अनेन उपनदस्य तटवर्तिनां बहूनां गृहाणां ग्रामं संयोजयतः सेतोः च उपरि सङ्कटः मण्डलायते। सूचनां प्राप्य 'आसरङ्ग-लिप्पा' क्षेत्रस्य बी.डी.सी. सदस्यः शशिनेगी घटनास्थलं सम्प्राप्य प्रभावितक्षेत्रस्य निरीक्षणं कृतवान्। अपरपक्षे महद्वृष्ट्या शिमलायां 'अग्रवाल धर्मशाला' समीपे स्थितस्य नगरनिगम-वाहनस्थानस्य (एमसी पार्किंग) भित्तिः (डङ्गा) पतिता। अनेन वाहनस्थाने स्थिते द्वे याने अपि भित्त्या सह अधः स्खलिते, अधः स्थितेषु चतुर्षु वाहनेषु च प्रस्तराः पतिताः।

## किन्नौरे गृहाणामुपरि पतिताः शैलाः, १८ जनाः सुरक्षितस्थानेषु प्रापिताः

किन्नौरमण्डलस्य 'कुप्पा' ग्रामस्य उपरितनशैलस्य 'कुखरिंग डोखङ्ग' उपरि गुरुवासरमध्याह्ने बृहत् भूस्खलनं संजातम्। पर्वतात् महन्तः शैलाः ग्रामस्य उपरि पतिताः। शैलानां प्रहारेण द्वे गृहे क्षतिग्रस्ते अभवताम्, एकं गृहं च पूर्णतया विनष्टम्। सौभाग्येन भूस्खलनस्य शब्दं श्रुत्वा जनाः पूर्वमेव गृहाणि त्यक्त्वा सुरक्षितस्थानं प्राप्ताः। शैलानां सम्पातेन सेबफलानां सप्त उद्यानानि, एकं शौचालयम्, एका गोशाला, एकम् अङ्गणं जलवाहिन्यः (पाइप) च क्षतिं प्राप्ताः। साङ्गलायाः तहसीलदारस्य हरदयालसिंहस्य नेतृत्वे प्रशासनस्य दलं घटनास्थलं सम्प्राप्तम्। चतुर्णां परिवाराणां १८ जनान् अपसार्य स्थानीय 'जीरा फार्म कुप्पा' मध्ये स्थानान्तरितं विहितम्, तत्र च तेषां भोजनस्य व्यवस्था अपि कृता अस्ति।

## पाँवटा साहिब क्षेत्रे १० जुलाई दिनाङ्के पिहितानि स्थास्यन्ति सर्वाणि शिक्षणसंस्थानानि

सिरमौरमण्डले गतेभ्यः द्वाभ्यां दिनाभ्यां अतिवृष्टेः क्रमः प्रचलति। निरन्तरवृष्ट्या नदोपनदाः उद्वेगे सन्ति। पाँवटा साहिब क्षेत्रे वर्षाकारणात् बहुषु स्थानेषु जलपूरणम् (जलमग्नता) जायते। प्रशासनेन १० जुलाई दिनाङ्के पाँवटा साहिब क्षेत्रस्य सर्वाणि शिक्षणसंस्थानानि पिधातुं (बन्द रखने का) निर्णयः स्वीकृतः। पाँवटा साहिब क्षेत्रस्य एस.डी.एम. द्विजगोयलः अवदत् यत् सर्वाणि शिक्षणसंस्थानानि निर्दिष्टानि सन्ति। गृहे बालकानां सुरक्षां स्थापयन्तु। तेन ज्ञापितं यत् प्रसारितादेशानुसारम् उपमण्डल-पाँवटा साहिब अन्तर्गतं आगच्छत्सु सर्वेषु विद्यालयेषु, अङ्गनबाड़ीकेन्द्रेषु अन्यशिक्षणसंस्थानेषु च अवकाशः घोषितः अस्ति।

## प्रावृट्कालेन सम्पूर्णं भारतं आवृतम्, हिमाचले १५ जुलाई पर्यन्तं वर्षिष्यन्ति मेघाः

अपरपक्षे, गुरुवासरे दक्षिण-पश्चिम-मानसूनः उत्तरीयारबसागरं, राजस्थानं, हरियाणां पञ्जाबस्य अवशिष्टभागान् च प्रति अग्रे प्रवृद्धः। अनेन प्रकारेण एषः ९ जुलाई दिनाङ्के सम्पूर्णे देशे सम्प्राप्तः, यत्रैव सामान्यरूपेण एषः ८ जुलाई दिनाङ्के प्राप्नोति स्म। ऋतुविज्ञानकेन्द्र-शिमलायाः अनुसारं ११ तथा १२ जुलाई दिनाङ्कयोः राज्यस्य अधिकांशभागेषु मन्दतः मध्यमा वृष्टिः भवितुं सम्भावना अस्ति। अस्मिन् अन्तराले केषुचित् स्थानेषु अतिवृष्टिः भवितुं शक्नोति। सप्ताहस्य अवशिष्टेषु दिनेषु राज्यस्य बहुषु भागेषु मन्दतः मध्यमा वृष्टिः प्रचलिष्यति। अद्य केषुचित् स्थानेषु प्रचण्डतः अतिवृष्टेः नारङ्ग-सतर्कता प्रसारिता। १० तः १५ जुलाई पर्यन्तं केषुचित् भागेषु महद्वृष्टेः 'येलो अलर्ट' (पीत-सतर्कता) वर्तते।

## कस्मै मण्डलाय कदा वृष्टेः सतर्कता

| दिनाङ्कः | प्रभावितमण्डलानि तथा वृष्टेः पूर्वानुमानम् |
|---|---|
| **१० जुलाई** | मण्डी, शिमला, सिरमौरः, सोलनमण्डलेषु केषुचित् स्थानेषु अतिवृष्टिः; काङ्गड़ामण्डले केषुचित् स्थानेषु मध्यमतः अतिवृष्टेः सम्भावना। |
| **११ जुलाई** | चम्बा, काङ्गड़ा, कुल्लूः, मण्डी, शिमला, सिरमौरः, सोलनमण्डलेषु केषुचित् स्थानेषु अतिवृष्टेः सम्भावना। |
| **१२ जुलाई** | सिरमौर, मण्डी, काङ्गड़ामण्डलेषु केषुचित् स्थानेषु अतिवृष्टेः सम्भावना; शिमला, सोलनमण्डलेषु केषुचित् स्थानेषु मध्यमतः प्रचण्डवृष्टेः आसारः। |
| **१३ जुलाई** | मण्डी, शिमला, सोलनं, सिरमौरः, कुल्लूः इत्येतेषु मण्डलेषु केषुचित् स्थानेषु मध्यमतः प्रचण्डवृष्टेः सम्भावना वर्तते। |

## ऋतुविज्ञानविभागस्य परामर्शः

> कस्यापि यातायात-परामर्शस्य (ट्रैफिक एडवाइजरी) अनुपालनं कुर्वन्तु।
> दुर्बलेषु क्षेत्रेषु तथा तेषु स्थानेषु गमनं वर्जयन्तु यत्र प्रायः जलपूरणस्य समस्या भवति।
> अतिवृष्टेः काले लघु नदीषु/धारासु तरणं (तैरना) नौकाविहारं (बोटिंग) च न कुर्वन्तु।
> राज्यसर्वकारस्य पक्षतः प्रसारितानां परामर्शाणाम् अनुपालनं कुर्वन्तु।

# 'यदि भाजपासर्वकारः अभविष्यत् तर्हि किशाऊ- बन्धस्य पुरातनां सहमतिं स्वीकृत्य प्रदेशाय आर्थिकभारः वोढव्यः अभविष्यत्'- मुख्यमन्त्री सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुमहोदयेन कथितं यत् यदि प्रदेशे भाजपायाः मुख्यमन्त्री अभविष्यत्, तर्हि किशाऊ-बन्ध-प्रकरणे प्रदेशस्य जनानाम् अधिकारैः सह सहमतिः अभविष्यत्। यदि प्रदेशे भाजपायाः सर्वकारः अभविष्यत्, तर्हि सः पुरातनां सहमतिं स्वीकृतवान् अभविष्यत्, येन प्रदेशाय आर्थिकभारः वोढव्यः अभविष्यत्। परन्तु अस्मत्सर्वकारेण वर्ष २०२३ मध्ये एव एषा सहमतिः अस्वीकृता आसीत्। तेन प्रोक्तं यत् वर्तमान- काङ्ग्रेससर्वकारेण अस्यां प्रमुखायां परियोजनायां स्वकीयानाम् अधिकाराणां दृढतया पक्षपोषणं कृतम्, अतः अद्य हिमाचलस्य हितानां विजयः जातः, येन हिमाचलप्रदेशाय प्रतिवर्षं ६०० कोटिरूप्यकाणाम् आयः भविष्यति।

## सर्वकारः सर्वसामान्यानां विचारान् भूमितले अवतारयति

मुख्यमन्त्रिणा 'जी मीडिया समृद्धि संवाद' इति कार्यक्रमे कथितं यत् काङ्ग्रेससर्वकारः जनतायाः विचारान् धरातले (भूमितले) अवतारयति, एतदेव व्यवस्थापरिवर्तनम् अस्ति। तेन प्रतिपादितं यत् अनाथबालकानां, विधवा-एकलनारीणां, मेधाविच्छात्राणां सर्वेषां च दीनानां कृते राज्यसर्वकारेण योजनाः विरच्य भूमितले प्रचालिताः सन्ति। आपत्काले अपि काङ्ग्रेससर्वकारेण स्वसंसाधनैः पूर्णतया क्षतिग्रस्तानां गृहाणां कृते साहाय्यराशिः एकलक्ष- त्रिंशत्सहस्ररूप्यकेभ्यः (१,३०,०००) वर्धयित्वा ८ लक्षरूप्यकाणि कृता अस्ति, सम्पूर्णे देशे च एषः एव सर्वाधिकः परिहारः प्रदीयते।

## केन्द्रसर्वकारेण उपेक्षायाः आरोपः

तेन उक्तं यत् यस्य सर्वकारस्य आर.डी.जी. रूपेण प्राप्यमाणा प्रतिवर्षं १० सहस्रकोटिरूप्यकाणां धनराशिः न्यूनीकृता अस्ति, सः सर्वकारः हिमाचलप्रदेशं स्वावलम्बनं विधातुं निरन्तरं कर्माणि करोति। तेन केन्द्रसर्वकारस्य उपरि उपेक्षायाः आरोपं चिक्षिपता कथितं यत् प्रधानमन्त्रिणः घोषणायाः परम् अपि अद्य यावत् हिमाचलप्रदेशाय आपदा-साहाय्यस्य १५०० कोटिरूप्यकाणि न प्राप्तानि। प्रदेशस्य चतुर्भ्यः लोकसभासनेभ्यः भाजपायाः सांसदाः निर्वाचिताः सन्ति, परन्तु एकवारमपि चत्वारोऽपि सांसदाः मिलित्वा प्रधानमन्त्रिणः साहाय्यं याचितुं न गतवन्तः। मुख्यमंत्रीमहोदयेन कथितं यत् तेन स्वकीयायाः वैयक्तिकायाः आयात् ५१ लक्षरूप्यकाणि आपदाप्रभावितेभ्यः दाने दत्तानि। इतः पूर्वं यदा जयरामठाकुरः मुख्यमन्त्री आसीत्, तदापि तेन कोविड-महामारीकाले ३५ लक्षरूप्यकाणां दानं सर्वकाराय दत्तम् आसीत्। तेन प्रोक्तं यत् प्रदेशभाजपायाः पञ्चसु दलेषु सत्तायाः लालसा वर्तते, सम्प्रति च एतेषु दलेषु उपान्त्यक्रीडा ('सेमीफाइनल') प्रचलति। कस्यचित् प्रश्नस्य उत्तरे मुख्यमन्त्रिणा कथितं यत् भाजपा निर्वाचनतः पूर्वम् ई.डी., सी.बी.आई. इत्येतयोः राजनैतिकं दुरुपयोगं करोति, परन्तु काङ्ग्रेससर्वकारः पूर्णपारदर्शितया सह कार्यं करोति। तेन प्रतिपादितं यत् सार्ध-त्रिवर्षाणां कार्यकाले वर्तमान-काङ्ग्रेससर्वकारस्य मन्त्रिमण्डले एकोऽपि आरोपः नास्ति।

# संस्कृतपठनस्थगनस्य विरोधे हजारीबागनगरे विशाला पदयात्रा




**हिमसंस्कृतवार्ताः- प्रज्ञा द्विवेदी, हजारीबाग।** सप्तममासस्य षड्विंशत्युत्तरद्विसहस्रतमे कृष्टाब्दे गुरुवासरे सन्तकोलम्बामहाविद्यालयस्य के. बी. महिलामहाविद्यालयस्य च छात्राः संस्कृतानुरागिणश्च ताभ्यामुभाभ्यां महाविद्यालयाभ्यां संस्कृतविभागस्यापाकरणस्य विरोधे हजारीबागनगरे विशालां पदयात्रामकुर्वन्। सा पदयात्रा भाग्यमणिविवाहमण्डपादारभ्य झण्डाचतुष्पथ- बंशीलाल- चतुष्पथ के. बी. महिलामहाविद्यालय- डिस्ट्रिक्टमोडमार्गेण हजारीबाग- उपायुक्तकार्यालयं गत्वा ततः विनोबाभावेविश्वविद्यालयस्य कुलपतिकार्यालयं यावत् प्राचलत्। अस्मिन्समये ते हजारीबागसांसदं मिलित्वा अस्मिन्विषये तस्मै एकं ज्ञापनमददुः। तदनन्तरमुपायुक्तकार्यालये उपायुक्तस्यानुपस्थितौ ते अनुमण्डलपदाधिकारिणे ज्ञापनं समार्पयन्। ततः कुलपतिकार्यालये कुलपतेरनुपस्थितिकारणात् ते कुलसचिवाय ज्ञापनं प्रायच्छन्। सर्वेऽधिकारिणश्छात्रेभ्यः संस्कृतप्रेमिभ्यश्च सकारात्मकमुत्तरमददुः। सांसदस्तयोरुभयोर्महाविद्यालययोः संस्कृतविभागे नामाङ्कनं शीघ्रमेव पुनः प्रारब्धं कारयितुमाश्वासनमयच्छत्। अनुमण्डलपदाधिकारी अवदद्यत् स स्वोच्चाधिकारिणोऽस्याः समस्याया विषये ज्ञापयिष्यति, चास्योचितसमाधानं प्राप्तुं प्रयतिष्यते। कुलसचिवोऽकथयद्यत् स शासनमस्याः समस्याया विषये पूर्वमेवाज्ञापयत्। विश्वविद्यालय-प्रशासनमुक्तरूपेणोभयोर्महाविद्यालययोः संस्कृतस्य नामाङ्कनं प्रारब्धं कारयितुमथकप्रयासं करोति तथा चातिशीघ्रमेवास्य सकारात्मकपरिणामो द्रक्ष्यते इति स अवदत्। अस्यां सम्पूर्णपदयात्रायां छात्रेष्वद्भुतोत्साहोऽवालोक्यत। सम्पूर्णपदयात्राकाले ते संस्कृतविषयस्य रक्षायै नैकान् घोषानघोषयन्। नगरवासिनः संस्कृतविषयं प्रति छात्राणामेतत्प्रेम समर्पणञ्च प्राशंसन् स्वसमर्थनं प्रादर्शयन् तथा चावश्यकतायां सत्यां साहाय्यमपि दातुमवदन्।

# एस.ओ.एफ. ओलम्पियाडेषु डी.पी.एस. बोकारो- विद्यालयस्य विद्यार्थिनां उल्लेखनीया सिद्धिः





**हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो,**
साइन्स ओलम्पियाड फाउण्डेशन (एस.ओ.एफ.) संस्थया आयोजितासु द्वितीयस्तरीय- ओलम्पियाड- परीक्षासु दिल्ली-पब्लिक-विद्यालयस्य (डी. पी. एस.) बोकारो-विद्यालयस्य षोडश विद्यार्थिनः उल्लेखनीयां सफलतां प्राप्तवन्तः। तेषु अष्टौ विद्यार्थिनः जोनल-पदं–१ प्राप्तवन्तः। अन्ताराष्ट्रीय-इङ्ग्लिश-ओलम्पियाड-परीक्षायाम् आराध्या मिश्रः जोनलपदं– १, आदित्यराजः जोनलपदं– ३, अविरल- तन्मयः जोनल-पदं–४ प्राप्तवन्तः। नेशनल-साइन्स-ओलम्पियाड-परीक्षायाम् ईशान-गौरवः तथा जय-सात्विक-मेदिरेड्डी जोनल-पदं–१, आदित्य-मिश्रः तथा आयुषी-सिंहः जोनल-पदं–२, आदित्यराजः तथा श्रीसन्त-कुमारः जोनल-पदं–३ प्राप्तवन्तः। अन्ताराष्ट्रीय-मैथमेटिक्स- ओलम्पियाड- परीक्षायाम् अमनराज अमनः जोनल-पदं–१, दीप्तांशु कुमारः जोनल-पदं–२ प्राप्तवान्। अन्ताराष्ट्रीय- सोशल- स्टडीज- ओलम्पियड- परीक्षायां ध्रुव श्रीवास्तवः जोनलपदं–३ प्राप्तवान्।
प्राथमिक-विभागस्य विद्यार्थिषु प्राणिद्यकुमारी मिश्रा इङ्ग्लिश, साइन्स तथा मैथमेटिक्स-ओलम्पियाडेषु जोनलपदं–१, सोशल-स्टडीज-ओलम्पियाडे च जोनलपदं–३ प्राप्तवती। समन्यु चौधरी मैथमेटिक्स ओलम्पियाडे जोनल-पदं–१, अथर्व कश्यपः जोनलपदं– २, अवियांक-मण्डलः तथा रीतिमान्या क्रमशः साइन्स तथा मैथमेटिक्स-ओलम्पियाडयोः जोनलपदं–३ प्राप्तवन्तौ। पदं–१, पदं–२ तथा पदं–३ प्राप्तविद्यार्थिभ्यः क्रमशः स्वर्ण-, रजत- तथा कांस्य-पदकानि, प्रमाणपत्राणि, पारितोषिकराशयश्च प्रदत्ताः। प्राणिद्यकुमारी मिश्रायै एकेडमिक एक्सीलेन्स स्कॉलरशिप अपि प्रदत्ता।
विद्यालयस्य प्राचार्यः डॉ. ए. एस. गंगवारः सफलविद्यार्थिनः सम्मान्य अभिनन्दितवान्। सः उक्तवान् यत् एषा सिद्धिः विद्यार्थिनां परिश्रमस्य तथा शिक्षकाणां समुचितमार्गदर्शनस्य फलमस्ति।

# जे.पी. नड्डा महोदयस्य बुद्धिजीविभ्यः आह्वानम् – 'विकसितभारत-२०४७' इति लक्ष्याय राष्ट्रनिर्माणे भागिनः भवन्तु

केन्द्रीय-स्वास्थ्य-एवं-परिवार-कल्याण-मन्त्री जगतप्रकाशनड्डः बुद्धिजीविनः 'विकसितभारत-२०४७' इति लक्ष्यस्य प्राप्तये राष्ट्रनिर्माण-प्रक्रियायां सहभागिनः भवितुम् आहूतवान्। भाग्यनगरे (हैदराबाद) आयोजितं बुद्धिजीवि-सम्मेलनं सम्बोधयन् जे.पी. नड्डः अवदत् यत् केन्द्रसर्वकारस्य शासनं "सबका साथ, सबका विकास, सबका विश्वास" तथा च "सर्वेभ्यः न्यायः" इति सिद्धान्तेषु आधारितम् अस्ति। सः अकथयत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे सर्वकारस्य दृष्टिकोणः समावेशी-विकासः, उत्तरदायित्वं, प्रभावी-कार्यान्वयनम्, प्रत्येकस्य नागरिकस्य सम्मानं च सुनिश्चितं कर्तुं केन्द्रितः अस्ति।सः अवदत् यत् सर्वकारेण ग्रामीण-दूरस्थक्षेत्रेषु विद्युत-मार्गसम्पर्क-आवश्यकमूलभूतसंरचनानाम् विस्तारं कृत्वा आर्थिकविकासः तथा च सामान्यजनानां कल्याणं द्वयम् अपि प्राथमिकतायां स्थापितम्। श्रीनड्डः अवदत् यत् उन्नत-मार्गेण कृषकाणां कृषि-उत्पादान् आपणं (बाजार) प्रति अधिककुशलतया प्रेषणे सहायता मिलिता, येन ग्रामीण-अर्थव्यवस्था सुदृढा जाता। अनेन उत्तम-आयः उत्पादकता च प्राप्ता।भारतस्य अङ्कीय-परिवर्तनस्य (डिजिटल-ट्रान्सफॉर्मेशन) उल्लेखं कुर्वन् नड्डः अवदत् यत् अङ्कीय-भुगतानं (डिजिटल-पेमेन्ट) तथा च प्रत्यक्ष-लाभ-हस्तान्तरणं (डीबीटी) पारदर्शितां वित्तीय-समावेशनं च उन्नतम् अकुरुताम्। सः अवदत् यत् क्यूआर-कोड (QR Code) आधारित-लेनदेनं ग्रामेषु लघु-नगरेषु च सामान्यं जातम्। एतत् देशे अङ्कीय-प्रौद्योगिक्याः (डिजिटल तकनीक) वर्धमानं प्रयोगं दर्शयति।निर्धनता-उन्मूलनस्य जनकल्याण-कार्यक्रमाणां च चर्चां कुर्वन् सः अवदत् यत् लक्षशः जनाः निर्धनतायाः मुक्ताः अभवन्। अपरपक्षे लाभार्थिनः आवास-वित्तीयसहायता-स्वास्थ्यसंरक्षण-योजनानां अन्तर्गतं निरन्तरं साहाय्यं प्राप्नुवन्ति।श्रीनड्डः 'आयुष्मान् भारत' योजनां विश्वस्य बृहत्तमा जनस्वास्थ्य-बीमा-परियोजना इति अवर्णयत्। एषा योजना योग्यानां लाभार्थिनां कृते ५ लक्षरूप्यकाणि यावत् स्वास्थ्य-कवरेज (बीमा) प्रदाति।

# लौकिकन्यायकोशः

## काचमणिन्यायः

काचखण्डस्य मणेश्च सादृशम् अस्ति। परन्तु योग्यरीत्या परीक्षा कृता चेत् द्वयोः भेदः स्पष्टो भवति। स्वस्य गुणैः एव स्वस्य श्रेष्ठत्वम् अथवा नीचत्वं निर्धार्यते केवलबाह्यदर्शनं तस्मिन् प्रमाणं नास्ति इति न्यायस्य अस्य भावः। यथा-

**"मणिर्लुठति पादेषु**
**काचः शिरसि धार्यते।**
**क्रयविक्रयवेलायां**
**काचः काचो मणिर्मणिः।।"**

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**



# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य भारतदेशे एका विचित्रा वार्ता श्रुता। एकः लोहपथग-प्रकोष्ठः नवदम्पत्योः कृते कुसुमैः गुच्छकैः च सज्जीकृतः।
**काव्या-** सत्यम्, साधारण-लोहपथगस्य कृते एतादृशी सज्जा विचित्रा एव। अन्या एका वार्ता फ्लोरिडा-राज्ये प्रवृत्ता। तत्र एकः मनुष्यः नक्र- व्याप्त- जलप्रणाल्यां पतितः। यदा आरक्षकाः तं रक्षितुम् उद्यताः, तदा तेन आरक्षकाः एव ताडिताः। सः आरक्षकैः सह युद्धं कृतवान् अस्ति। ततः सः आरक्षकैः निगृहीतः।
**नन्दिनी-** अहो मूर्खता! नक्र-युक्ते जले आरक्षकैः सह युद्धम् अतीव विचित्रम् एव। अधुना विमान-यात्रायाः विषये वदामि। इदानीं विमानपत्तनेषु मुखाकृति-अभिज्ञान-पद्धतिः स्वीकृता। तव मुखम् एव विमान-प्रवेश-पत्रं जातम्।
**काव्या-** सत्यम्, विना पत्रं यात्रा-प्रणाली अतीव आधुनिकी विचित्रा च। अन्तिमा वार्ता तन्त्रांशक्षेत्रात् आगता। सामाजिक- माध्यम- मञ्चे एकः प्रबन्धकः अवोचत् यत् कृत्रिमबुद्धिः एव सर्वाणि तन्त्रांश-कार्याणि स्वयमेव करिष्यति। तेन कारणेन अभियन्तॄणां मध्ये महान् वाद-विवादः जनितः।
**नन्दिनी-** सत्यम्, तन्त्रांश-प्रगतिः वेगेन जाता, तथापि मानव-बुद्धिः श्रेष्ठा एव। अद्यतन-वार्ताः अत्रैव समाप्यन्ते। धन्यवादः।